M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. / Ser. 9/5

Title: Gadadhari

915

Z

		Gādādhari	Title.
			Author.
			Editor.
			Year, Vols.
Sk			Publisher.
Nyaya		Incomplete	Remark.

915

योगितायां तादृशाभावात् भेदत्वादेरेवावच्छेदकत्वे नायोगोलकाभेदत्वस्य विशेषितस्यानवच्छेदकतयाऽतिप्रसंगाभावेनाव
वच्छेदकताया संबंधेक्यस्यात्र विवक्षणात् तस्मात् हृदत्वादि पाठः कात्स्न्र्यकः अतस्य प्राचीनपुस्तकेषु त्रोटितत्वमितिबहवः व्या
वर्तस्य साध्ये विशेषणान्वयेनेऽव्यभिचारीत्यत्र कर्मधारयभ्रमं च निराकर्तुमाद्या वर्तते तथा मितितथा च यो वर्तते सो ध्येयं मव्यभिचारित्वेया
मव्याभिचारित्वं व्याप्तिरित्यर्थः। दूषितमित्यत्र हेतुप्रयति केवलान्वयिन्यव्याप्तेरिति। ननु साध्याव्यभिचारितस्याप्रसिद्धेरितिभावः।
एतस्मिन् लक्षणे [redacted] कात्स्न्र्यस्य विशेषतः किंचिन्निष्ठत्वेनानुपादानात्। कात्स्न्र्यस्याधिकरणत्वविकल्पपुरस्सरं दोषं दानयन्
तयाऽनुत्तरग्रंथयोर्ज्ञपितं मूलस्य न्यूनतां च परिहर्तुमाहकात्स्न्र्यमित्यादि। साध्याश्रयस्येत्यस्यात्यादिद्वयं च मूलस्य न्यूनतापरिहा
राय एकलघुमसंबंधस्य वक्षावशावादितियेषदर्शनात्। व्याप्तिः साध्यनिष्ठत्वं दर्शयितुं वयमस्मेषु विकल्पयति। आद्य इति स्यात् अंशो
दोषमाह व्याप्तिश्चेति। ननु साध्यनिष्ठसामानाधिकरण्यनिरूपकत्वं यद्धर्मो व्यापकं तद्धर्मवत्त्वं व्याप्तिरतो नोक्तदोष इत्यत आह पृथि
वीति। पृथिवीत्ववन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वमित्यत्र ज्ञापकत्वेन तत्र च विषयितया ज्ञानानिष्ठत्वात्तया सर्वस्यैवतादृशज्ञा
नस्य प्रतियोगितावच्छेदकत्वात्तदनवच्छेदकाप्रसिद्धिरतः समवायितावच्छेदकातादृशभावरूपं तादृशप्रतियोगितानवच्छेदकत्वं वा
च्यं तथा च समवेतस्य गगनादेरेव तादृशप्रतियोगितानवच्छेदकत्वात्तत्पृथिवीत्वसमानाधिकरण्याभावान्नातिव्याप्तिः स्यादत एतत्से
पत्र येगगना——रणाघनातीति। समवेत परं द्रव्यत्वादेरेकव्यक्तिकत्वेन कात्स्न्र्याभावादेवं विधहेतुकरणं। अतएव उक्तातिव्या

ताया व्यभिचारित्वेन यत्स्वयं निष्ठभेदप्रतियोगितावच्छेदकस्य ज्ञानित्वस्य केनापि संबंधेन साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकत्वाभा
वात्कथमेवं नियमः। समवायाद्यवच्छिन्नज्ञात्यभावप्रतियोगितायां नित्यत्वादेर्वैयर्थ्येन समवेतत्त्वस्यैवावच्छेदकत्वादिति वाच्यं। विशिष्य
तासंबंधेन ज्ञातेरभावस्य नित्यगुणादिविशेष्यकज्ञानपि सत्त्वेन तत्र नित्यानेकसमवेतत्वनूपसाध्ययस्मिस्यपि कश्चित्। द्वितीयलक्षणे सं
बंधविवक्षाया फलमाह एकसंबंधेति। सामान्यतस्तादृशाभावप्रतियोगितानवच्छेदकत्वेऽप्रसिद्धिरतः यत्किंचित्संबंधावच्छिन्नत्वप्रति
योगितायामितिवेशे संबंधो क्या विवक्षणे दोष इति स्फुटयितुमेकसंबंधावच्छिन्नत्वेन प्रतियोगिता निर्दिष्टा उक्तेविवक्षणेलक्षणद्वयस्ये
वातिप्रसंगभयं दर्शयति। व्यभिचारिण्येवेति। विशेषणेति। विशेषणता विशेषश्चात्र प्रमाविषयित्वी बोध्यः। संबंधविशेषप्रवेशे
लाघवात्कस्यांतरं। वस्तुतइतियत्यदं हेतुपरं यद्धर्मावच्छिन्नेति साध्यतावच्छेदकावच्छिन्नेत्यर्थः। अत्र धूमवान्वह्नेरित्यादौ वह्निमन्नि
ष्ठभेदप्रतियोगितावच्छेदकस्यायोगोलकान्यत्वस्य धूमवत्त्वप्रकारकप्रमाविशेष्यत्वादिविषयेतयात ज्ञानप्रतियोगितावच्छेदकत्वात्तत्प्रति
योगितावच्छेदकसंबंधाप्रवेशेऽव्यवच्छेदकाघटकसंबंधैक्यविवक्षणमावश्यकं तथा च कलाघवं। न चोत्पन्ना भावघटितलक्षणे प्रतियो
गितावच्छेदकसंबंधैक्यविवक्षणेऽपि अवच्छेदकताघटकसंबंधैक्यविवक्षणे विशेषणतानिशेषावच्छिन्नवह्निमन्निष्ठाभावप्रतियोगिताव
च्छेदकस्यायोगोलकान्यत्वस्य विषयितयात ज्ञानाभावस्य तादृशविशेषणतावच्छिन्नप्रतियोगितावच्छेदकत्वादिति वाच्यं
स्यादिति वाच्यं अभावीयविशेषणतया ज्ञानाभावस्य व्यधिकरणसंबंधावच्छिन्नप्रतियोगिताकाभाववत्वेन केवलान्वयितया तत्र रामः

नुसरणं। ननु तद्देवास्तु प्रतियोगित्वमते सद्धेतावपि दूषयति। स्वाभावेत्यादि। विवक्षितत्वस्यार्थे तथात्वे विस्यात् प्रतियोगित्वौसत्त्व प्रकारान्तरेणापि प्रतियोगि
त्तायाः प्रवेशं दर्शयति। अभाववत्त्वेति द्रव्यादिषट्कान्योन्याभाववत्त्वे प्रतिबंधकत्वे स्वकालावच्छेदेन स्वकत्रवर्त्तमानत्वप्रतियोगिकोऽभावः तत्र प्र
तियोगितानिरूपकत्वघटकत्वावस्थेः तथाविधेति। अभावत्वस्यैककालावच्छेदेन स्वकत्रवर्त्तमानत्वप्रतियोगिकोऽभावः तत्र प्रतियोगितानिर्वच
नानुयोगत्वदवस्थेः तथाविधेति। अभावत्वादिप्रकारेत्यर्थः। विनेति। तच्चाप्यभावत्वा स्यप्रवेशात् तत्तस्य च प्रतियोगिताघटितत्वस्य दु
र्वचत्वादिति भावः। यत्साध्यस्येत्यत्र लक्षणे धारयन्नेवाशिर्हेतुरित्यादि स्वातंत्र्यतः षष्ठीसमासोऽभिप्रायेणाह यत्समानाधिकरणेति। यावत्सा
धनाव्यापकं न व्यापकं यत्साध्यस्य तत्त्वं यावत्साध्यव्यापकव्यापकयस्यूतत्त्वमित्यनौपाधिकत्वद्वयं क्रमेणापरिष्कुर्वन्ति। यत्समानाधिकरणा
त्यंताभाव इति। धूमवान्वह्नेरित्यत्र तादृशप्रतियोगिनावच्छेदकस्य घटत्वादेर्धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वात् तु यावदिति। घ
टत्वादेर्धूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकस्यापि द्रव्यत्वादेर्वह्निसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वात्तत्रापि यावदि
ति। नीलकदोषद्वितीयमूलोक्तदोषः। एकसंबंधपर्यवसानेनानुगमात्। अत्र च विशेषणविशेष्यस्यापि न वैशिष्ट्यस्यैव विशेषप्रवेशेन स्यादाह विशेष
णत्वेति। प्रथमे संबंधविशेषणत्वे वैशिष्ट्ययोगात् प्रतियोगितावच्छेदकमात्रस्यैवेति। मात्रपदेन हेत्वर्थकं तथा च हेतुसमानाधिकरणाभावप्र
तियोगितावच्छेदकस्य तु तत्तत्यात्वमिति धूमवान्वह्नेरित्यादावतिव्याप्तिरिति भावः। धूमवान्वह्नेरित्यादौ अयोगोलकभेदात्वा
दीनां यथासाध्यसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वं तथा प्रागेव दर्शितं। न चैवं जातिमत्त्वादिसत्तातादात्म्येन जातेः साध्य

पादिकत्वं स्यात् तत्र समवायावच्छिन्नवह्निसमानाधिकरणाभावप्रतियोगितावच्छेदकीभूतस्यापि द्रव्यत्वादेः संयोगावच्छिन्नधूमवन्निष्ठाभावप्रतियो
गितावच्छेदकत्वात् द्रव्यत्वस्योपाधित्वसंभवात्। न च प्रतियोगितासामान्यानवच्छेदकत्वघटितामेव व्याप्तिं वाच्यं। धूमवान्वह्नेरित्यादौ अयोगोलकभे
दत्वमेव धूमवन्निष्ठाभावप्रतियोगितासामान्यानवच्छेदकं संयोगावच्छिन्नाभावप्रतियोगितायामयोगोलकभेदत्वस्य गुरुतया भेदत्वस्यैवावच्छेदकत्वा
दिति वाच्यं। जन्यमात्रस्यैककालोपाधितयाऽयोगोलकाभेदानधिकरणे द्रव्यावच्छेदेन कालिकसंबंधावच्छिन्नप्रतियोगिताकायोगोलकभेदाभाव
स्यापि धूमवन्निष्ठतयाऽयोगोलकभेदत्वस्य तादृशाभावप्रतियोगितावच्छेदकत्वात्। एवं पृथिवीरूपवत्त्वादित्यादौ व्यभिचाराधिकरणजलभे
दादीनां कालिकसंबंधावच्छिन्नाभावस्य पार्थिवपरमाणौ सत्त्वादुपाधेरप्रसिद्धिरित्यादिकमूह्यं। तत्संबंधावच्छिन्नाया एवेति वह्निमान्धूमा
दित्यादौ तु द्रव्यत्वेनातिप्रसंगः। तत्र समवायावच्छिन्नधूमवन्निष्ठाभावप्रतियोगितावच्छेदकत्वस्य द्रव्यत्वेऽभावादिति भावः। तद्वाच्यमु
पाधित्ववाच्यं। तथा चेति द्रव्यं विषमस्योऽन्योन्याभावमादाय दोषासंसर्ग इति। स च अस्वरसः। व्यधिकरणसंबंधेति। यद्यपि समानाधिकर
णसंबंधावच्छिन्नाभावस्यैव तत्र पि सर्वत्र अभाववत्तितत्संबंधेन प्रतियोगिनो व्यभिमानाभाववृत्तिव्यधिकरणसंबंधानुसरणमफलं। तथापि तेन
संबंधेन प्रतियोगिमत्ताज्ञानं यत्र तत्र तत्कालावच्छेदेन तदा तादृशाभावज्ञानाभावद्वारकोऽनाप्रसिद्धिः संभवतीति तत्संबंधेनानुधावनं मि
ति। अत्र सर्वत्र पंचलक्षण्यां तस्य चैतत्सत्त्वहेतुत्वेनान्वयिन्यभावज्ञानप्रतिबंधकज्ञानविषयत्वं द्रष्टव्यं। एवमाहास्यभावसंबंधित्वस्येति। संबंधत्व राम
तद्वृत्तितानौपाधिकत्वे केवलस्य नानवच्छेदकत्वे चेत्यतः स्वाभावज्ञानविषयत्वेति उभयत्रैव प्रतियोगिनिष्ठत्वं संपादयितुं विशिष्य

साधनाधिकरणे परमाण्वादावसत्त्वात्। [redacted] साधनव्यापकत्वं मध्यस्तसंबंधत्वविवक्षायाः प्रकृतेऽकृतत्वात्। संबंधविवक्षेणेत्त्वं त्यंतप
दानस्य स्वयमेव वक्ष्यमाणत्वात्। एवं तत्परमाणवहत्रित्वादिनापि नोपाधित्वं संबंधसामान्ये न परमाणवहत्रित्वस्य जन्यत्ववद्व्यणुकनिष्ठभेदप्रति
योगितावच्छेदकत्वात् स्वरूपसंबंधेन परमाणुहत्रिन्यादेः परमाणावपि सत्त्वेन साधनसाधनव्यापकत्वात्। केचित्तु घटाभावान्यत्ववान् प्रमेयत्वा
दित्यादौ व्यभिचारनिरूपकाधिकरणस्य घटाभावस्य यदन्यत्वं तदवच्छिन्नदस्य घटाभावात्मकयोर्ते घटाभावान्यत्वस्य घटाभावान्यत्वस्य समा
नाधिकरणघटाभावप्रतियोगितावच्छेदकत्वात् घटाभावान्योन्याभावेनोपाधिः घटाभावत्वप्रकारकप्रमाविरोधित्वाभावत्वस्य च साध्य
वन्निष्ठभेदप्रतियोगि[redacted]तावच्छेदकत्वेन उपाधितायत्या अत्यंताभावपदस्य संसर्गाभावपरतया सार्थकत्वमित्याहुः। अन्योन्याभावप्र
तियोगिन्यव्याप्तिं निरस्यति। प्रतिबध्नातीति। प्रतिबंधकत्वं कारणीभूताभावप्रतियोगित्वं चेत्तदाश्रयत्वमाश्रयद्रूपस्य तथात्वाह। प्रतिबंधकं
त्वं चावेति। अत्र प्रतियोगिलक्षणे प्रतियोगिज्ञानयोर्भिन्नकालावच्छेदेनैकत्वात्मनि सत्त्वे रेककालावच्छेदेनेति। एकावृत्तिणावच्छेदेनेत्यपि बो
ध्यं तेन कायव्यूहद्वणायाविभिन्नशरीरावच्छेदेन एकत्वात्मनि एककालावच्छेदेन सत्त्वेपि न दोषः। अन्योन्याभावबुद्धिं प्रतिप्रतियोगिता
वच्छेदकज्ञानस्यापि प्रतिबंधकत्वात् तत्राप्यतिव्याप्तिं निरस्यति। अभावपदस्येति। घटान्योन्याभावस्य न घटत्वस्याभाव इति। न च तत्रातिव्या
प्तिरिति भावः। वक्ष्यमाणे स्वरसादाह वस्तुतस्त्विति। एकसंबंधेति। तथा च यत्किंचित्संबंधावच्छिन्नप्रतियोगितानवच्छेदकत्वघटितव्यापकत्वस्याप्रसि
द्ध्याव्यापकत्वलेशैर्यत्किंचित्संबंधावच्छिन्नत्वस्य प्रतियोगितायां विवक्षणेऽव्यापकत्वदले च तदविवक्षणे वह्निमान् धूमादित्यादेरनानो

यत्र सत्त्वानौपाधिकत्वं तद्रूपव्याप्तिरिति। लक्षणे उपाधिलक्षणे वैयर्थ्यमिति धूमवान् वह्नेरित्यादौ धूमवत्तिवर्तमानीयमधुर्द्रेंधनाद्य
न्योन्याभाववत्त्वदभावत्वस्याद्रेंधनादावनततेः उपाधिलक्षणसंभवेनानौपाधिकत्वरूपव्याप्तिलक्षणस्यातिव्याप्त्यभावात्। अन्योन्या
वप्रतियोगितावारणाय अत्यंतपदं व्यर्थं॥ ननु धूमवान् वह्नेरित्यादौ तदार्द्रेंधनस्यापि उपाधित्वात्तस्य च तद्धूमसमानाधिकरणे ध्वंसप्रागभा
वप्रतियोगित्वादनुपाधित्वसंभवश्चेति ध्वंसादिवारणायात्यंतपदं सार्थकमत आह सर्वत्रैव नित्यस्येति। तत्रापि व्यभिचाराधिकरणायोगो
लकान्यत्वस्य उपाधित्वस्य संभवान्नौपाधिकत्वलक्षणातिव्याप्तिः उपाधिलक्षणस्याप्रकृतत्वान्न तदव्याप्तिदोष इति भावः। नित्यस्यापि वि
नाशाभावादिप्रतियोगित्वावच्छेदकत्वानुसरणाभावरूपकं तथा चात्यंतस्यापि नित्यसाधारणधर्मेणाप्रकृतोपाधितासंभवत्वे
विनाशायेनाह नित्यसाधारणेति। तथा च तदार्द्रेंधनायोगोलकभेदान्यतरत्वेन तदार्द्रेंधनस्यापि उपाधित्वमित्यर्थः। इतरथा। भे
दप्रतियोगितां साधारणप्रतियोगितामात्रस्य लघुत्वे भेदप्रतियोगितेति धूमवान् वह्नेरित्यादावयोगोलकान्यत्वादरूपाधौ र्धर्म
वन्निष्ठभेदप्रतियोगित्वादिति। तस्य चात्यंताभावपदस्यानचसर्वत्रव्यभिचाराधिकरणान्यस्य साध्यसाध्यवदन्यतरस्य
वात्त्वेनोपाधित्वसंभवस्येति। तद्वारणमफलमिति वाच्यं। इदं जन्यत्ववत्पृथिवीत्वादित्यत्र व्यभिचाराधिकर
णपरमाणुभेदस्य परमाणुत्वाभावस्य वानौपाधित्वं तस्य जन्यत्वसमानाधिकरणभेदप्रतियोगित्वात्। परमाणुभिन्न
स्य जन्यत्व तदन्यतरस्य वानौपाधित्वं तादृशस्य परमाणावपि सत्त्वेन साधनव्यापकत्वात्। न च नादात्म्यसंबंधेन

करणे चेत्यर्थः। ननु अयं दोषः नाम्नास्ति। तद्धि समवायसंबन्धावच्छिन्नसत्ताभाववति सामान्यादौ। तादृशेति। प्रतियोगितावच्छेदकसं
बंधेन प्रतियोगिसंबन्धव्यधिकरणान्तदन्यप्रभावकत्वमित्यर्थः। प्रकृते च तादृशप्रतियोगित्वे ऽव्याप्तिस्तत्तादृशप्रतियोगि[redacted]तासंबंधेना
धिकरणं सत्ताभाववद्वृत्तत्वाभाववत्त्वो नियामकसमवायेन हेतोरप्रसिद्धेस्तथापि सप्तमपदार्थरूपाभावप्रतियोगित्वस्य सकलस्यनि
त्यद्रव्यादिवृत्तित्वात्तदानीं तत्राव्याप्तिर्घटते इति दूषणान्तरमाह। व्यधिकरणेति। संयोगेन जात्यभावादौ संयोगेन जातिसंबंधाधि
करणाप्रसिद्धेरव्याप्तेरित्यर्थः। खंडशइति प्रतियोगितावच्छेदकसंबंधसामान्ये यत्प्रतियोगिकत्वं तत्तद्देशकालाद्यवच्छि
न्नपदार्थाधिकरणानुयोगिकत्वोभयाभाववत्त्वस्य तदभावप्रतियोगित्वे। संयोगसंबन्धसामान्ये च जातिप्रतियोगिकत्व
जात्यभाववदनुयोगिकत्वोभयाभावसत्त्वान्न तत्प्रतियोगित्वेऽव्याप्तिरिति तस्य रिहार इति तस्य तादृशोभयाभावव्याप्तिः परिहारः
आकाशे घटाघटाभावप्रतियोगित्वस्य वारणाय स्वाभावाधिकरणानुयोगिस्वत्वस्यावश्योपादानेऽस्य स्वाभावव
त्त्वपि वस्तुर्यस्य प्रतियोगित्वस्यानिरुक्तेः सूचिता। अप्रसक्तिरन्याभावप्रतियोगिनित्वस्यान्योन्याभावविरहात्स्वा
भावात्। अतिप्रसक्तिः। तत्त्वावच्छेदकेन तस्यैवान्योन्याभावविरहत्वात्तस्याह्नतोपयोगीति व्याप्तिलक्षणद्वयघटकेत्यर्थः। मा
त्रपदे नान्योन्याभावप्रतियोगित्वस्यावच्छेदः तथा चेदं पर्यवसितं साध्यवन्निष्ठोयोऽत्यन्ताभावस्तदभावत्वरूपेयत्प्र
तियोगित्वं तदभावत्वे संति साधनवन्निष्ठोयोऽत्यन्ताभावस्तदभावत्वरूपं प्रतियोगित्वं यच्च तस्य उपाधिरेतस्याभावे

नाव्याप्यवृत्तिनानाव्यक्तिकोपाधिः संग्रहस्तेनैतत्कपिसंयोगवद्भिन्नत्वप्रमाविशेष्यत्वाभावः। आर्द्रेन्धनवद्वि प्रकारकप्रमा
विशेष्यत्वाभावश्चाखंडरूपव्यापकत्वे के उपाधिरित्यर्थः। तद्द्विभत्वाभावस्य तद्भिन्नत्वात्। तत्प्रकारकप्रमाविशेष्यत्वस्य च विशे
ष्यभेदेन भिन्नत्वात्तद्गुरुतरात्तु सरणं। तस्यापि। अखंडस्यापि विशिष्टस्यातिरिक्तत्वे विशिष्टाभावस्य संबंधावात्मकत्वे वा विनाश्यस
न्तानप्रतियोगित्वमते आह। द्वित्वाद्यवच्छिन्नस्येति। संभवदिति। द्वित्वावच्छिन्नाभावस्यातिरिक्तस्य कस्यचिद् स्वेनेयगमात्केषुसामा
दस्यैव तादृशप्रतीतिविषयत्वाभ्युपगमात् इति साध्यसमानाधिकरणेति। अत्र नादृशप्रतियोगि[redacted]तानवच्छेदकत्वं यद्रूपेण
तद्रूपेण तादृशप्रतियोगितावच्छेदकत्वं वाच्यं तेन सद्धेतौ धूमहेत्वादेः धनत्वस्य वह्निसमानाधिकरणाभावप्रतियोगितानवच्छेदक
स्य महानसीयत्वविशिष्टस्य धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वेऽपि न क्षतिः। प्रतियोगितयोरेकसंबधावच्छि
न्नत्वादिकं पश्चाद्वक्ष्यति। अनवच्छिन्नेति विरोधित्वस्य परस्पराभावव्याप्यत्वरूपस्य प्रवेशेन तद्याशेऽपि विरोधित्वरूपप्रतियोगित्वघ
टकतया व्याप्तेतरणं प्रवेशादनवस्थेत्यर्थः। निनुनुक्तसहानवस्थायित्वेन तदधिकरणवृत्तित्वरूपे व्याप्तिरप्रवेशादनवस्था
यात्वंभावेपि दोषांतरमेव तत्रेति ध्येयं॥ अव्याप्यवृत्तेरिति। अत्रैकदेशोनावच्छिन्नकः। प्रागभावादेरिति। अत्रैककालीनावच्छेद
कत्वेन संबंधेनेति तत्संबंधावच्छिन्नप्रतियोगिताकाभाववति तेन संबंधेन प्रतियोगिनोऽवृत्तित्वव[illegible]मित्यर्थः। तथा राम:
पीतादात्म्येन वृत्तित्वस्याधेयत्वरूपस्याप्रसिद्ध्या कथमन्योन्याभावप्रतियोगिसाधारण्यमते आह। इच्छन्तीति। संवधभेदविष

प्रसिद्धं प्रातिस्विकरूपेणाधर्मस्य उपादानेनावच्छेदकत्वस्यैव तथोपपादनमुचितं किं व्यतिरेकित्वविशेषणेनेत्यत आह वस्तुतस्त्विति
तादृशस्येति। तथा च यावत्त्वदं तत्तद्धर्मवैयधिकरण्यावच्छेदघटकेदकूटस्यावबोधनाय। ननु धूमसमानाधिकरणपर्वतत्वादिवै
यधिकरण्यावच्छेदकमहानसीयवह्नित्वाद्यभिन्नतया वह्नित्वादेर्नेतादृशावच्छेदकभेदकूटवत्त्वं अत आह यावत्तादृशेति।
तादृशावच्छेदकत्वस्य महानसीयत्वविशिष्टवह्नित्वे पर्याप्तत्वेपि शुद्धवह्नित्वे तदभावः प्रतीतिबलादभ्युपेय इति भावः। यद्यप्य
वच्छेदकस्य व्यासज्यवृत्तित्वे तदवच्छिन्नभेदोपि शुद्धवह्नित्वे संभवति। एको न द्वाविति वत्। तथापि तदनभ्युपगमनेदं। तथा चेति इ
दं च साध्यसमानाधिकरणो धर्मो वह्निरेवेति ध्येयं। तस्य न्यूनतापरिहारस्तु तदधिकरणवृत्तित्वरूपमपि वैयधिकरण्यं द्रष्टव्यतिर
तेनेति। संबंधविशेषेणेति। एतत्त्वप्रागेव निरूपितं। आत्माश्रयेति। साध्यनिरूपितव्याप्तेः साध्यादिनिष्ठायाः प्रवेशात् आत्मा
श्रयः। आत्माश्रयादीति। धूमवान्वह्नेरित्यादौ धूमनिरूपितधूमनिष्ठप्रवेशे त्वन्योन्याश्रयः। धूमसामग्र्यादिनिष्ठस्य धूमव्याप्ति
निरूपकत्वस्यापि धूमसामग्रीव्यापकत्वघटितोपाधिघटितत्वात्। तत्र च धूमनिष्ठस्य धूमसामग्रीनिष्ठव्याप्तिनिरूपकत्वस्यापि
घटकत्वात्। ननु यत्र उपाधिरव्याप्यवृत्तिर्नानाव्यक्तिको वा तत्रोपाधित्वलक्षणसत्त्वात्। अनौपाधित्वलक्षणेति व्याप्तिरत आह य
त्रेति। इदमेतद्दृशस्त्ववतः द्रव्यत्वादित्यत्रैतत्कपिसंयोगोऽव्याप्यवृत्तिरुपाधिः। धूमवान्वह्नेरित्यादौ चार्द्रेन्धनादिर्नानाव्यक्ति
कोपाधिः। अंततनइति। व्यभिचारनिरूपकाधिकरणतत्तद्व्यक्तिभिन्नत्वस्यैवाखंडस्य सर्वत्रैव संभवादिति भावः। तद्वदिति। तत्सदे